## आश्रययोगनिरूपणम्

### शास्त्री-1

Date 14.08.20
Page 1

मेषादि नवांश जातफल —

तस्करभोक्तृविचक्षणधनिनृपातिनपुंसकाऽभयदरिद्राः।
खलपापोग्रोत्कृष्टा मेषादीनां नवांशभवाः॥

अथाश्रयनिरूपणं चाह — तत्रादावेव नवांशजातस्य स्वरूपमाह — यस्मिन् कस्मिन् राशौ लग्नगते मेषनवांशे [illegible] जातस्तस्करो भवति। वृषनवांशके जातो भोक्ता, मिथुननवांशके जातो विचक्षणः, कर्कनवांशके जातो धनी, सिंहनवांशे जातो राजा, कन्यानवांशके जातो नपुंसकः, तुलानवांशके जातः शूरः, वृश्चिकनवांशके जातो दरिद्रो भवति। धन्विनवांशके जातः खलो दुष्टो भवति। मकरनवांशके जातः पापो भवति। कुम्भनवांशके जात उग्रो भवति क्रूर इत्यर्थः। मीननवांशके जात उत्कृष्टो भवति।

भावार्थः — जन्म-समय किसी भी लग्न में मेष नवांश हो तो जातक चोर, वृष नवांश में भोग करने वाला, मिथुन नवांश में बुद्धिमान, कर्क नवांश में धनवान्, सिंह नवांश में राजा, कन्या नवांश में नपुंसक, तुला नवांश में निर्भय, वृश्चिक नवांश में निर्धन, धनु नवांश में दुष्ट, मकर नवांश में पापकर्म- परायण, कुंभ नवांश में क्रूर और मीन नवांश में उत्कृष्ट (श्रेष्ठ) होता है।

डॉ० सुरेन्द्र कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ० सं० महावि० सुखसेना, पूर्णिया

स्वराशिगत ग्रहों के फल—

कुलतुल्यकुलाधिकबन्धुमान्यधनिभोगिनृपसमनरेन्द्राः।
स्वर्क्षगतैकविवृद्धया किञ्चिन्न्यूना सुहृद्ग्रहगैः॥

एकविवृद्धया स्वक्षेत्रगतैर्ग्रहैर्जातस्य स्वरूपमाह— यस्मिन् कस्मिन् राशौ ग्रहे स्वक्षेत्रे जातः स्वकुलसदृशो भवति। द्वयोः स्वक्षेत्रयोः स्वकुलाधिकः, त्रिषु बन्धुमान्यः, चतुर्षु धनी, पञ्चसु भोगी, षट्सु नृपसमः, सप्तसु राजा। किञ्चिन्न्यूनः सुहृद्ग्रहगैः एकस्मिन् भावे मित्रक्षेत्रगते ग्रहे परविभवोपजीवी, द्वयोः सुहृद्-विभवोपजीवी, त्रिषु ज्ञातिविभवोपजीवी, चतुर्षु बन्धुविभवोपजीवी, पञ्चसु गणस्वामी, षट्सु बलस्वामी, सप्तसु राजा। उक्तं च— 'परविभवसुहृत्स्वबन्धुपोष्यगणबलेशनृपाश्च मित्रभेषु' इति॥

भावार्थ:- यदि जन्म के समय स्वराशि में एक ग्रह हो तो अपने कुल (पिता, पितामहादि) के सदृश, दो ग्रह हों तो कुल में श्रेष्ठ, तीन ग्रह हों तो बन्धुओं में मान्य, चार ग्रह हों तो धनवान, पाँच ग्रह हों तो भोगी, छः ग्रह हों तो राजा के तुल्य और सात ग्रह स्वक्षेत्री हों तो श्रेष्ठ राजा होता है। और एकादि मित्रराशिगत हों तो पूर्व कथित गुणों में कुछ कम गुण वाला जातक होता है।

डॉ० सुदिवर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा०उ० सं० महाविद्यालय सुखसेना, पूर्णियाँ

शास्त्री-I, II

वस्तुनिष्ठप्रश्ना:

Date 14.08.20
Page 3

(1) अश्वस्य कति ध्रुवावर्ताः भवन्ति ?

उत्तरम् - दश ।

(2) सन्दंशं मध्यमन्त्यं दशनयुगमथ: सोत्तरं वर्षजाते
स्फीतं द्व्यष्टके कषायं पतितसमुदितं त्रिचतुःपञ्चकेषु ।
नीस्त्रीनैककमस्थानचितहरिसिताकाचमाक्षीकशाङ्खं
छिद्रं चालच्युतिश्च प्लवति तुरगे लक्षणं वर्षजानाम् ॥
इति कस्य वाक्यम् ?

उत्तरम् - वररुचेः ।

(3) कति जातयो भवन्ति गजस्य ?

उत्तरम् - चत्वारः ।

(4) ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः स्निग्धोन्नताग्रदशनाः
पृथुलायतास्याः ।
चापोन्नतायतनिगूढनिमग्नवंशास्तन्वेकरोमचितकूर्मसमानकुम्भाः
इति कस्य लक्षणम् ?

उत्तरम् - गजस्य ।

(5) अन्याङ्गभ्यधिकं यस्य विस्तारेण स्तनान्तरम् ।
विकटः स च निर्दिष्टो दुर्गार्तिर्निन्दितो गजः ॥
इति किं गजस्य लक्षणम् ?

उत्तरम् - विकटगजस्य ।

(6) पादैः समांसैः सुस्निग्धैः सोष्णैः छिद्रैः सुशोभनैः ।
उन्नतैः स्वेदरहितैः शिराहीनैश्च पार्थिवः ॥
इति कुतः गृहीतम् ?

उत्तरम् - समुद्रात् ।

(7) पद्मरक्तोत्पलनिभैः तथा द्रुतजसन्निभैः ।
नृणाः पादतलैर्ज्ञेया ये चान्ये सुखभागिनः ॥
कस्य वाक्यमिदम् ?

उत्तरम् - गर्गस्य ।

P.T.O

(8) 'सिंहतुल्या कटिर्यस्य स नरेन्द्रो न संशयः' इति कस्य वचनम्?
उत्तरम्- समुद्रस्य।
(9) ग्रीवा च वर्तुला यस्य स नरो धनवान् स्मृतः।
कम्बुग्रीवा नरा ये तु राजानस्ते न संशयः॥
सुस्निग्धं मांसलं पृष्ठमभग्नं चाप्यरोमशम्।
सधनानां विपर्यस्तं निर्धनानां प्रकीर्तितम्॥
कस्य कथनमिदम्?
उत्तरम्- समुद्रस्य।
(10) निःस्वेदमांसलाः कक्षाः सुगन्धाः रोमसङ्कुलाः।
धनिनां तु विजानीयान्निर्धनानामतोऽन्यथा॥
कस्योक्तिरियम्?
उत्तरम्- समुद्रस्य।
(11) दीर्घायुषामङ्गुल्यः कीदृशाः भवन्ति?
उत्तरम्- दीर्घाः।
(12) स्थूलाङ्गुल्यः केषाम्?
उत्तरम्- निर्धनानाम्।
(13) कपिसदृशकराः के?
उत्तरम्- धनिनः।
(14) व्याघ्रपाणयः पुरुषाः के भवन्ति?
उत्तरम्- पापिनः।
(15) निम्नकरतलाः नराः कीदृशाः भवन्ति?
उत्तरम्- पितृवित्तेन विहीनाः।

डॉ० सुस्थिर कुमार
सहा० प्राध्यापक (ज्योतिष)
रा० उ० सं० महाविद्या० सुखसेना, पूर्णियाँ